ईषद्धास्यमुखीं नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
“सदा ईश्वरसंयुक्तं ञकारं शृणु सुन्दरि ! ।
रक्तविद्युल्लताकारं या स्वयं परकुण्डली ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥”

तस्य २२ द्वाविंशतिर्नामानि यथा,—
“ञकारो बोधनी विश्वा कुण्डली मखदो वियत् ।
कौमारी नागविज्ञानी सव्याङ्गुलनखो बकः ॥
शर्व्वेश्वर्य्यार्पिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
घर्मैकपादः सुसखो विरजा चन्द्रनेश्वरी ॥
गायनः पुष्पधन्वा च रागात्मा च वराचिणी ॥”
इति नानातन्त्रशास्त्रम् ॥

ञः, पुं, गायनः । घर्घरध्वनिः । इत्येकाक्षरकोषः ॥ वलीवर्द्दः । शुक्रः । वाममतिः । इति मेदिनी । ञे, १ ॥ (गणपाठे धातोरुभयपदत्वविज्ञापकोऽनुबन्धविशेषः । इति वोपदेवः ॥)

ञिः, पुं, प्रत्ययविशेषः । स प्रेरणार्थे भवति । तस्य इकारस्तिष्ठति । धातोरनुबन्धविशेषः । स वर्त्तमानक्तप्रत्ययबोधकः । इति वोपदेवस्वामी ॥

ञ्यन्तः, पुं, (ञिः प्रत्ययविशेषोऽन्ते यस्य ।) ञिप्रत्ययान्तः । यथा, “ञिणन्तपवित्रे” इत्यादि आत्मनेपदप्रकरणीयसूत्रम् ॥ स च प्रत्ययः धातोः शब्दाच भवति । यथा, ञिः प्रेरणे इति वेः सत्याख्याने ञिरिति च मुग्धबोधव्याकरणम् ॥ मुग्धबोधव्याकरणस्य परिच्छेदविशेषः । यथा, इति ञ्यन्तपादः ॥

ट

ट, टकारः । स व्यञ्जनैकादशवर्णः । टवर्गप्रथमवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे मूर्द्धस्थानेन जिह्वामध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः । मातृकान्यासेऽस्य दक्षिणस्फिचि न्यास्यत्वम् । वङ्गीयवर्णमालायाम्) तस्य लेखनप्रकारो यथा,—
“ऊर्द्धाधःक्रमतो रेखा कुण्डलीरूपतस्तथा ।
तिष्ठन्ति तासु नित्यासु कुवेरयमवायवः ॥
मात्रा कोणगता चोर्द्धा तत ऊर्द्धगता तु या ।
या नित्या परमा शक्तिश्चतुर्व्वर्गप्रदायिनी ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ! ।
मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभेक्षणाम् ॥
दशबाहुसमायुक्तां सर्व्वालङ्कारसंयुताम् ।
परमोक्षप्रदां नित्यां सदा स्मेरमुखीं पराम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा,—
“टकारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली ।
कोटिविद्युल्लताकारं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम् ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥”
इति कामधेनुतन्त्रम् ॥

तस्य २७ सप्तविंशतिनामानि यथा,—
“टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः ।
सुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः ।
वृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ॥
राजा गिरिर्म्महाधनुर्प्राणात्मा सुसुखो मरुत् ॥”
इति नानातन्त्रशास्त्रम् ॥

टं, क्ली, (टल् + डः ।) करङ्कः । इति विश्वः ॥

टः, पुं, (टल् + डः ।) वामनः । पादः । निस्वनः । इति मेदिनी । टे, १ ॥

टक, इ क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इ क, टङ्कयति । इति दुर्गादासः ॥

टक्कदेशीयः, पुं, (टक्कदेशे भव इति छः ।) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥

टगरः, पुं, (टः टङ्कणः क्षारविशेषः गर इव । तीव्रगुणत्वात्तथात्वम् ।) टङ्कणक्षारः । हेलाविभ्रमगोचरः । केकराक्षे, त्रि । इति मेदिनी । रे, १६० ॥

टङ्कः, पुं, (टकि + घञ् ।) कोपः । कोषः । असिः । ग्रावदारणः । इति मेदिनी । के, २४ ॥ (यथा, अनर्घराघवे । १ । २२ ।
“यः क्षत्रदेहं परितस्य टङ्कै-
स्तपोमयैर्म्मोक्षपथं चकार ।”)
परिमाणविशेषः । स तु चतुर्म्माषकरूपचतुर्व्विंशतिरक्तिकारूपो वा । जङ्घा । इति हेमचन्द्रः । ३ । ५८३ ॥ दर्पः । इति हलायुधः ॥

टङ्कः, पुं क्ली, (टकि + घञ् अच् वा ।) नीलकपित्थः । (यथा, सुश्रुते सूत्रस्थाने ४६ । “शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु ।”) खनित्रम् । टङ्कणः । इति मेदिनी । के, २४ ॥ दर्पः । इति शब्दरत्नावली ॥

टङ्ककः, पुं, (टङ्कति बध्नाति मनः स्वेनेति । टकि + ण्वुल् । यद्वा, टङ्क्यते बध्यतेऽनेन मन इति । घञ् । ततः संज्ञायां कन् ।) रजतमुद्रा । इति रूप्याध्यक्षशब्दे अमरटीकायां सारसुन्दरी भरतश्च ॥ टाका इति भाषा ॥

टङ्ककपतिः, पुं, (टङ्ककस्य पतिः रक्षकः ।) रूप्याध्यक्षः । टङ्ककशालानियुक्तः । इत्यमरटीकासारसुन्दरी ॥ टाकशालेर अध्यक्ष इति भाषा ॥

टङ्ककशाला, स्त्री, (टङ्ककस्य शाला ।) रजतमुद्रागृहम् । इत्यमरटीकासारसुन्दरी ॥ टाकशाल इति भाषा ॥

टङ्कटीकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

टङ्कणः, पुं, (टकि बन्धे + ल्युः । पृषोदरात् णत्वे साधुः ।) क्षारविशेषः । सोहागा इति भाषा । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“विरूक्षणोऽनिलकरः श्लेष्मघ्नः पित्तदूषणः ।
अग्निदीप्तिकरस्तीक्ष्णष्टङ्कणः क्षार उच्यते ॥”)
तत्पर्य्यायः । पाचनकः २ मालतीतीरजः ३ लोहश्लेषणः ४ रसशोधनः ५ । इति हेमचन्द्रः । ४ । १० ॥ टङ्कणक्षारः ६ रङ्गक्षारः ७ रसाधिकः ८ लोहद्रावी ९ रसघ्नः १० सुभगः ११ रङ्गदः १२ वर्त्तुलम् १३ कनकम् १४ क्षारम् १५ मलिनम् १६ धातुवल्लभम् १७ । इति राजनिर्घण्टः ॥ मालतीतीरसम्भवः १८ द्रावी १९ द्रावकः २० लोहशुद्धिकारकः २१ । इति भावप्रकाशः ॥ स्वर्णपाचकः २२ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफस्थावरादिविषकासश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवातपित्तकारित्वम् । रूक्षत्वम् । इति भावप्रकाशः ॥ (देशविशेषः । यथा, वृहत्संहितायाम् । १४।१२ ।
“कङ्कटटङ्कणवनवासि शिविकफणिकारकोङ्कणाभीराः ॥”)

टङ्का, स्त्री, (टकि + अच् टाप् ।) जङ्घा । इति मेदिनी । के, २५ ॥

टङ्कानकः, पुं, (टङ्कं दर्पं कोपं वा आनयति उद्दीपयतीति । आनू + णिच् + ण्वुल् ।) श्लेष्मदारुवृक्षः । इति शब्दचन्द्रिका ॥

टङ्कारः, पुं, (टम् वैक्लव्ये + बाहुलकात् डः । टं वैक्लव्यं चित्तस्य विकृतिं करोतीति । कृ + कर्म्मण्यण् ।) विस्मयः । प्रसिद्धः । शिञ्जितध्वनिः । इति मेदिनी । रे, १६० ॥ (यथा, काशीखण्डे । २६ । ६६ ।
“टीकिताशेषपाताला टङ्किकेलोऽद्रिपाटवे ।
टङ्कारश्रुत्यकल्लोला टीकनीया महातटा ॥”
कृ + घञ् । कारः टं इति अव्यक्तशब्दस्य कारः करणं यत्र । ध्वनिमात्रे । यथा, भागवते । ३ । १७ । ९ ।
“अन्तर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम् ।
शृगालोलूकटङ्कारैः प्रणेदुरशिवाः शिवाः ॥”)

टङ्कारी, स्त्री, (टङ्कं ऋच्छतीति । ऋ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । ततो गौरादित्वात् ङीष् ।) क्षुपविशेषः । टेकारी इति भाषा । अस्य गुणाः । वातश्लेष्मशोफोदरव्यथानाशित्वम् । तिक्तत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

टङ्गः, पुं क्ली, (टकि + अच् ।) खनित्रम् । खड्गभेदः । जङ्घा । इति मेदिनी । गे, ७ ॥

टङ्गः, पुं, (टङ्क + पृषोदरात् साधुः ।) टङ्कणः । इति शब्दचन्द्रिका ॥ सोहागा इति भाषा । चतुर्म्माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥

टङ्गणः, पुं क्ली, (टङ्कण + पृषोदरात् साधुः ।) टङ्कणः । सोहागा इति भाषा । अस्य गुणाः । श्लेष्मवायुनाशित्वम् । क्षाररसत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । अग्निवर्द्धकत्वम् । विरूक्षणत्वम् । भेदकत्वम् । बलवर्द्धनत्वञ्च । इति राजवल्लभः ॥

टङ्गिणी, स्त्री, (टकि बन्धे + णिनिः । ततः पृषोदरात् णत्वे ङीपि च साधुः ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ आकनादि इति भाषा ॥